# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Half Yearly Examination (2023– 2024)**

**Class IX** **MM: 80**
**Subject: Sanskrit** **Time: 3. Hrs.**
Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***
***General Instructions: All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | अपठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## (खण्ड–क) अपठित अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

कल्पनाचावला भारतस्य प्रथमा महिला अन्तरिक्षयात्रिणी आसीत्। अस्याः जन्म 1961 तमे वर्षे हरियाणाप्रदेशे अभवत्। बाल्यादेव सा अन्तरिक्ष–विहारस्य विषये चिन्तयति स्म। पंजाबविश्वविद्यालयात् वैमानिक–इंजीनियरिंग इति विषयस्य अध्ययनम् कृत्वा सा अमेरिका देशे उड्डयनस्य प्रशिक्षणम् अलभत्। तत्रैव सा कोलराडो–विश्वविद्यालयात् 'डॉक्टरेट' इति उपाधिना विभूषिता। प्रथमवारं सा नासा अन्तरिक्षयानेन अन्तरिक्षयात्राम् कृतवती। 2003 तमे वर्षे फरवरी मासस्य प्रथम दिवसे कोलम्बिया इति अन्तरिक्षयानेन स्वान्तारिक्षयात्रा साफल्येन समाप्नोत्। तस्याः धराम् प्रति आगमनकाले याने काचित् तकनीकिः त्रुटि आगता। तदा नियन्त्रणकक्षे अधिकारिभिः सह वार्ताम् अपि अभवत्। विश्वस्य जनाः दूरदर्शने यात्रायाः अन्तिमचरणस्य विवरणं पश्यन्तः स्थिताः आसन्। सहसा अन्तरिक्षयानं दुर्घटनाग्रस्तम् अभवत्। सा च स्वसहयात्रिभिः एवं अग्नेः ज्वालासु विलुप्ता। सर्वं विश्वं स्तब्धं शोकाकुलं च जातम्।

**I एकपदेन उत्तरत –** *(केवलं प्रश्नद्वयम्)* **(1X2=2)**

- **i** भारतस्य प्रथमा महिला अन्तरिक्षयात्रिणी का आसीत् ?
- **ii** प्रथमवारं सा कस्मिन् याने अन्तरिक्षयात्राम् अकरोत् ?
- **iii** 'डॉक्टरेट' इति उपाधिना का विभूषता ?

**II** **पूर्णवाक्येन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(2X2=4)**

i बाल्यादेव कल्पनाचावला किं चिन्तयति स्म ?

ii कल्पनाचावलायाः याने कदा त्रुटि आगता ?

iii कल्पना चावला कस्मिन् विषये अधीतवती ?

**III** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1X1=1)**

*(इस अनुच्छेद का उचित शीर्षक लिखिए)*

**IV** **यथानिर्देशम् उत्तरं लिखत–** *(केवलं प्रश्नत्रयम्)* **(1X3=3)**

i 'विश्वस्य जनाः दूरदर्शने यात्रायाः अन्तिमचरणस्य विवरणं पश्यन्तः स्थिताः आसन्' अत्र 'आसन्' इति क्रियापदस्य कर्तृपदम् किम् ?

ii 'अकस्मात्' इति अस्मिन् अर्थे किम् पदम् अत्र प्रयुक्तम् ?

iii 'सा च स्वसहयात्रिभिः एव।' अत्र 'सा' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

iv 'वह्निः' इत्यर्थे अनुच्छेदे किं पदम् प्रयुक्तम् ?

## (खण्ड–ख) रचनात्मकं–कार्यम्

**प्र0 2 रमेशस्य अनुजः अतुलः अम्बालानगरे छात्रावासे निवसति। रमेशेन समयस्य सदुपयोगाय अतुलाय लिखितं इदं पत्रं मंजूषायां दत्तैः पदैः पुनः उत्तरपुस्तिकायां लिखत–** **(½X10=5)**

(रमेश का अनुज अतुल अम्बाला के छात्रावास में रहता है। रमेश के द्वारा समय का सदुपयोग बताते हुए लिखे गए पत्र को पुनः लिखिए।)

(1) ————

दिनांक 22 / 09 / 2023

प्रिय अतुल! (2 )———

अत्र कुशलं तत्र (3)————। अतुल! मानवजीवनस्य प्रतिपलं (4)——— अस्ति। विश्वे प्रकृतेः सम्पूर्णानि कार्याणि नियमितसमये (5)————। उचितसमये यदि वृष्टिः न भवेत् तदा सर्वं क्षेत्रं शुष्येत्। तथैव बाल्यकाले यदि छात्रः न पठति तदा असौ समस्तजीवने (6)———— करोति। समयः तस्य एव जनस्य कार्येषु सहभागितां करोति यः (7)———— सदुपयोगं करोति। गते काले शोकः (8)———— । समयः कदापि कस्यचिदपि (9)——— न करोति।

अतः सदा समयस्य सदुपयोगः करणीयः।

भवतः (10)———

रमेशः

| |
|---|
| , अग्रजः, शुभाशीषः, दिल्लीनगरतः, महत्वपूर्णम्, समयस्य, पश्चात्तापः, भवन्ति, प्रतीक्षाम्, अस्तु, निरर्थकः |

प्र03 मंजूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत– (1X5=5)

| |
|---|
| प्रातः, रक्षासूत्रम्, श्रावणी पूर्णिमा, मिष्टान्नानि, भ्राता, उपहारम्, अगस्तमासे, नूतनानि वस्त्राणि, |
| बध्नाति, भगिनि, तिलकं, पुष्पाणि, करे , स्नात्वा, पूजादिकं, पर्वाणि, प्रसन्नाः, पौराणिकः, प्रमुखं, |



प्र0 4 अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत– (पंच वाक्यानि) (1x5=5)

क) पिता पुत्र के लिए कलम लाता है।
ख) लोग वायुयान से विदेश जाते हैं।
ग) वह इस समय पढ़ रहा है।
घ) नदी पर्वत से निकलती है।
ङ) वह ज़ोर से हँसती है।
च) वह खाकर विद्यालय जाती है।
छ) दादा जी समाचार–पत्र पढ़ रहे हैं।

## (खण्ड–ग) अनुप्रयुक्तव्याकरणम्

प्र0 5 अधोलिखितवाक्येषु स्थूलपदानाम् संधि–विच्छेदं वा प्रदत्तः विकल्पेभ्यः चित्वा लिखत–
*(केवलं प्रश्नचतुष्टयम्)* (1X4=4)

i साम्प्रतं **ग्रीष्म + ऋतुः** अस्ति।

(क) ग्रीष्मऋतुः (ख) ग्रष्मर्तुः
(ग) ग्रीष्मर्तुः (घ) ग्रीष्मतूः

ii लम्बोदरः गणेशस्य नाम अस्ति।

(क) लम्बो + उदरः (ख) लम्बम् + उदरः

(ग) लम्ब् + उदरे (घ) लम्ब + उदरः

iii सः **पावनं** रामचरितं पठति।

(क) पौ + अनम् (ख) पाव + अनम्

(ग) पाव + अनम् (घ) पो + अनम्

iv **पुस्तकालये** शान्तं तिष्ठः।

(क) पुस्त + कालये (ख) पुस्तक + आलये

(ग) पुस्तका + लये (घ) पुसत + काले

v हनुमान् **कपि + ईशः** कथ्यते।

(क) कपीइशः (ख) कपिशः

(ग) कपीशः (घ) कपेशः

**प्र0 6 उचित शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत–** *(केवलं प्रश्नचतुष्टयम्)* **(1x4=4)**

i द्वौ ------गृहम् गच्छतः।

(क) बालकैः (ख) बालकौ

(ग) बालकाः (घ) बालकान्

ii धनिकः ----- धनम् ददाति।

(क) निर्धनाय (ख) निर्धनस्य

(ग) निर्धनात् (घ) निर्धनेन

Iii तेन ----- सह रामः अगच्छत्।

(क) लक्ष्मणः (ख) लक्ष्मणम्

(ग) लक्ष्मणेन (घ) लक्ष्मणाय

iv तानि फलानि ---- सन्ति।

(क) मधुरान् (ख) मधुरम्

(ग) मधुरे (घ) मधुराणि

v ----- तत्र न गच्छामि।

(क) अहम् (ख) अस्माकं

(ग) आनाम् (घ) वयम्

**प्र0 7 उचित धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत–** (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

i 'भू' धातोः रुपम् अस्ति, ------।

(क) पठानि (ख) गच्छानि

(ग) भवानि (घ) नमानि

ii एकः चन्द्रः तमः -------।(विधि•)

(क) हति (ख) हतः

(ग) हन्यात् (घ) हन्ति

iii श्रद्धावान् ——————— ज्ञानम्।

(क) लभते (ख) लभेते

(ग) लभसे (घ) लभेथे

iv सा बालिका कुत्र ——————?

(क) गच्छामि (ख) गच्छसि

(ग) गच्छति (घ) गच्छन्ति

v भवान् कस्यां कक्षायां ——————?

(क) पठामि (ख) पठसि

(ग) पठति (घ) पठत

**प्र0 8 निम्नलिखितवाक्येषु विकल्पेभ्यः उचितपदं चित्वा लिखत**–(केवलं प्रश्नचतुष्टयं) **(1X4=4)**

i नद्याः ——— वहन्ति।

(क) परोपकारे (ख) परोपकाराय

(ग) परोपकारः (घ) परोपकारै

ii श्री ——————— नमः।

(क) गणेशेः (ख) गणेशम्

(ग) गणशेन (घ) गणेशाय

iii अस्मिन् ——— चत्वारः बालकाः सन्ति।

(क) कक्षे (ख) कक्षात्

(ग) कक्षम् (घ) कक्षस्य

iv ——————— पुष्पाणि वर्षन्ति।

(क) आकाशे (ख) आकाशाय

(ग) आकाशात् (घ) आकाशेन

v ——— प्रतिदिनं पितरं नमति।

(क) रामेण (ख) रामात्

(ग) रामः (घ) रामस्य

**प्र0 9 प्रदत्तः विकल्पेभ्यः उचितानि प्रत्ययानि चित्वा लिखत**– **(1X3=3)**

i धनी धनं **दा + क्त्वा** पुण्यम् अर्जयति।

(क) दित्वा (ख) दत्त्वा

(ग) दितवा (घ) दाक्त्वा

ii अर्जुनः युद्धे **योद्धुम्** उद्यतः न आसीत्।

(क) युध् + तुमुन् (ख) योध् + तुमुन्

(ग) यौद् + तुमुन् (घ) येद्ध + तुमुन्

iii ते अत्र **आ + गम् + ल्यप्** कोलाहलं कुर्वन्ति।

(क) आगाय (ख) आगमीय

(ग) आगत्य (घ) आगत्वा

iv काकः जलं **पीत्वा** आनन्छम् अनुभूतः।

(क) पे + त्वा (ख) पी + तु

(ग) पी + त्वा (घ) पा + क्त्वा

**प्र0 10 अधोलिखित वाक्येषु उचित संख्यारूपैः रिक्तस्थानानि पूरयत–** **(½ x 4=2)**

i मंचे ——(4) नायिकाः नृत्यन्ति।

ii पाण्डवाः ————(5) भ्रातरः आसन्।

iii शङ्करस्य ————(3) नेत्राणि सन्ति।

iv कक्षे —— (1) बालिका नृत्यति।

**प्र0 11 निम्नलिखितेषु पदेषु प्रयुक्तान् उपसर्गान् लिखत–** **(½ x 4=2)**

प्रभवति, अनुगमनम्, निरादरः, अभिज्ञानम

**प्र0 12 वाक्यानुगुणम् उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत–** **(½ x 4=2)**

i यथा कर्म —— फलम्।

(क) तदा (ख) तथा

(ग) कदा (घ) अत्र

ii यदा माता गृहे आगच्छति ——— अहं विद्यालयं गच्छामि।

(क) कदा (ख) तथा

(ग) तदा (घ) अत्र

iii असत्यम् ———— मा वद।।

(क) कदापि (ख) तावत्

(ग) कुत्र (घ) यत्र

iv आकाशे मेघाः ——— गर्जन्ति।

(क) नीच्चैः (ख) कदा

(ग) किम् (घ) उच्चैः

## (खण्ड–घ) पठित–अवबोधनम्

**प्र0 13 अधोलिखितम् अनुच्छेदं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

तदा खिन्नो बालकः एते पक्षिणो मानुषेषु नोपगच्छन्ति।तदन्वेषयाम्यपरं मानुषोचितं विनोदयितारमिति परिक्रम्य पलायमानं कमपि श्वानमवलोकयत्। प्रीतोबालस्तमित्थं संबोधयामास– रे मानुषाणां मित्र! किं पर्यटसि अस्मिन् निदाघदिवसे ? आश्रयस्वेदं प्रच्छायशीतलं तरुमूलम् अहमपि क्रीडासयायं त्वामेवानुरूपं पश्यामीति। कुक्कुरः प्रत्याह–

यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य।

रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि। इति।

**I एकपदेन उत्तरत–** *(केवलं प्रश्नद्वयम्)* **(½X2=1)**

i बालकः कीदृशं श्वानम् अवलोकयत् ?

ii स्वामिनः गृहस्य रक्षां कः करोति ?

iii श्वानम् दृष्ट्वा बालः कीदृशः जातः ?

**II पूर्णवाक्येन उत्तरत–** **(1X2=2)**

i प्रीतो बालः कुक्कुरः किं संबोधयामासः ?

ii कीदृशः बालकः पक्षिणो मानुषेषु नोपगच्छन्ति ?

**III निर्देशानुसारं लिखत–** *(केवलं प्रश्नद्वयम्)* **(1X2=2)**

i 'ग्रीष्मे' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

(अ) तरुमूलम् (ब) निदाघदिवसे

(स) पर्यटसि (द) खिन्नः

ii 'मानुषोचितं' इति पदे कः सन्धि–विच्छेदः वर्तते ?

iii 'परिक्रम्य' अस्मिन् पदे कः प्रत्ययः अस्ति ?

**प्र0 14 अधोलिखितं श्लोकं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

पिबन्ति नद्यः स्वयमेव नाम्भः

स्वयं न खादन्ति फलानि वृक्षाः।

नादन्ति सस्यं खलु वारिवाहाः

परोपकाराय सतां विभूतयः।।

I एकपदेन उत्तरत– *(केवलं प्रश्नद्वयम्)* (½X2=1)

i काः स्वयमेव अम्भः न पिबन्ति ?
ii केषां विभूतयः परोपकाराय भवन्ति ?
iii वृक्षाः किं न खादन्ति ?

II पूर्णवाक्येन उत्तरत– (1X2=2)

i वारिवाहाः स्वयं किं न खादन्ति ?
ii के स्वयं फलानि न खादन्ति ?

III यथानिर्देशम् उत्तरत– *(केवलं प्रश्नद्वयम्)* (1X2=2)

i 'परोपकारः' पदे का सन्धिः वर्तते ?
ii 'अन्नम्' इति पदस्य श्लोके समानार्थकः पदं किम् ?
iii 'विभूतयः' अस्मिन् पदे कः उपसर्गः वर्तते ?

**प्र0 15 अधोलिखितम् नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

**चन्दनः –** अस्तु। गच्छ। सखिभिः सह धर्मयात्रायाः आनन्दिता च भव। अहं सर्वमपि परिपालयिष्यामि। शिवास्ते सन्तु पन्थानः।

**चन्दनः –** मल्लिका तु धर्मयात्रायैः गता। अस्तु, दुग्धदोहनं कृत्वा ततः स्वप्रातराशस्य प्रबन्धं करिष्यामि। (स्त्रीवेषं धृत्वा,दुग्धपात्रहस्तः नन्दिन्याः समीपं गच्छति )

**उमा –** मातुलानि! मतुलानि!

**चन्दनः –** उमे! अहं तु मातुलः। तव मातुलानि तु गंगास्नानार्थं काशीं गता अस्ति। कथय! किं ते प्रियं करवाणि ?

**उमा –** मातुल! पितामहः कथयति, मासानन्तरम् अस्मत् गृहे महोत्सवः भविष्यति। तत्र त्रिशत–सेटकमितं दुग्धम् अपेक्षते। एषा व्यवस्था भवद्भिः करणीया।

**चन्दनः –** (प्रसन्नमनसा) त्रिशत–सेटकपरिमित दुग्धम्, शोभनम्! दुग्धव्यवस्था भविष्यति एव इति पितामहं प्रति त्वया वक्तव्यम्।

**उमा –** धन्यवादः मातुल! यामि अधुना। ( सा निर्गता)

I एकपदेन उत्तरत– *(केवलं प्रश्नद्वयम्)* (½X2=1)

i मल्लिका कुत्र गता ?
ii मातुलानि! मतुलानि इति का वदति ?
iii कीदृशः चन्दनः नन्दिन्याः समीपं गच्छति ?

II पूर्णवाक्येन उत्तरत– (1X2=2)

i मासानन्तरम् गृहे किं भविष्यति ?

ii महोत्सवे कति दुग्धम् अपेक्षते ?

III यथानिर्देशम् उत्तरत– (*केवलं प्रश्नद्वयम्*) (1X2=2)

i 'हर्षिता' इत्यर्थे किं पदं प्रयुक्तम् ?

ii 'शोभनम्' इति पदस्य विलोम पदं किम् ?

iii 'करवाणि' इति क्रियापदस्य कर्तृपदम् किम् ?

**प्र0 16 स्थूलपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–** (केवलं चतुष्टयम्) **(1X4=4)**

i सनीरे समीरे **मन्दं–मन्दं** वहति।

ii बालिका **निर्धनमातुः** दुहिता आसीत्।

iii मल्लिका **सखिभिः** सह धर्मयात्रायैः गच्छति स्म।।

iv **खलानाम्** मैत्री आरम्भगुर्वी भवति।

v चटकः **स्वकर्मणि** व्यग्रः आसीत्।

**प्र0 17 निम्नलिखित श्लोकयोः अन्वयं मंजूषा सहायतया पुनः लिखत–** **(½X4=2)**

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।

गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः।।

**अन्वयः–** पुरुषैः सदा हि ——— एव प्रयत्नः ———।

यतः गुणयुक्तः——— अपि, अगुणै युक्तै ——— समः ना (अपितु श्रेष्ठः भवति)

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।। **(½X4=2)**

**अन्वयः–** सर्वे ——— प्रियवाक्यप्रदानेन——— तस्मात् सर्वैः ——— वक्तव्यं।

वचने का———।

| |
|---|
| ईश्वरैः, दरिद्रः, कर्तव्यः, गुणेषु, दरिद्रता, तदेव, तुष्यन्ति, जन्तवः |

**प्र0 18 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य पुनः लिखत–** **(½X8=4)**

*(निम्नलिखित घटनाक्रम को उचित क्रमानुसार पुनः लिखिए।)*

**i)** सः चिन्तयामास विरमन्तु इते वराकाः पुस्तकदासाः।

**ii)** सन्तु एते निष्कुटवासिनः एव प्राणिनः मम वयस्या इति।

**iii)** तन्द्रालु बालः लज्जया तेषां दृष्टिपथमपि परिहन्नेकाकी किमपि उद्यानं प्रविवेश।

**iv)** भ्रान्तः कश्चन् बालः पाठशालागमनवेलायां क्रीडितुम् निर्जगाम।

**v)** यतः ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः बभुवुः।

**vi)** अथ स पुष्पोद्यानं व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडाहेतुराह्वयत्।

**vii)** किन्तु तेन सह केलिभिः कालं क्षेप्तुम् तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्।

**viii)** अहम् पुनरात्मानं विनोदयिष्यामि।

**प्र0 19 अधोलिखितपदेषु पर्यायः पदेन सह मेलनम् कुरुत–** **(1X3=3)**

| | |
|---|---|
| (1) अनुमतिम् | (क) सविस्मयम् |
| (2) ध्रुवम् | (ख) आज्ञा |
| (3) साश्चर्यम् | (ग) निश्चितम् |

——00——